International Journal of Sanskrit Research 2020; 6(1): 149-153

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 149-153
© 2020 IJSR
www.anantaajournal.com
Received: 28-11-2019
Accepted: 30-12-2019

**डा. शकुन्तलादाश**
अंशकालिक–अध्यापिका
श्रीजगन्नाथसंस्कृत विश्वविद्यालयः,
श्रीविहारः, पुरी,उत्कलाः, ओडिशा,
भारत

# शास्त्रेषु प्रायश्चित्तस्वरूपविधानम्

**डा. शकुन्तलादाश**

**शोधसारः**
धर्मशास्त्रसाहित्ये मुख्यतः त्रयविषयाः सन्ति। तेषु विषयेषु आचारः, व्यवहारः, प्रायश्चित्तश्चेति। धर्मशास्त्रसाहित्यस्य पर्यालोचनेन बहवः विषयाः दृष्टिपथारूढः भवन्ति। तेषु प्रायश्चित्ताध्यायमेकं महत्वपूर्णं स्थानम् विद्यते। संस्कारस्य, श्राद्धस्याशौचस्यापि दैनन्दिनलोकोपयोगित्वात् तेषां महत्त्वमावश्यकत्वं च जगति जनानां सम्यक् विद्यते, तद्वत् प्रायश्चित्तस्यापि आवश्यकता अस्ति। प्रयाश्चित्तं भवति पापक्षयसाधनभूतं नैतिककर्म । यदि कश्चित् ज्ञानतोऽज्ञानतः वा कामतोऽकामतो वा गुरुं लघं वा पापमाचरति तदर्थं सः पापतारतम्येन प्रायश्चित्तम् आचरेदिति सर्वैः मन्वादिस्मृतिकारैः गौतमादिसूत्रकारैः च प्रतिपादितम्। यद्यपि ज्ञानकृतस्य कामकृतस्य च पापस्य निष्कृतिः नास्ति इति याज्ञवल्क्येन प्रतिपादितं, तथापि प्रायश्चित्तं लोकसंव्यवहारार्थं कर्त्तव्यम्। अन्यथा सः समाजे निन्दनीयः स्यात्, यदि अकामतः अज्ञानतो वा किंचित् पापम् आचरितम्, तस्य परिणतिरूपं नरकादिकं मरणानन्तरं माभूदिति हेतोः प्रायश्चित्तमाचरणीयम्। अतः तदेवभावं मनसि निधाय शास्त्रेषु प्रायश्चित्तस्वरूपविधानम् इति शीर्षकमाधारीककृत्य शोधनिबन्धमिमं संरचितवती।

**कूटशब्दाः** प्रायश्चित्त,पातकं,धर्मशास्त्रे प्रायश्चित्तं, शास्त्रेषु प्रायश्चित्तं

**प्रस्तावना**
चतुर्षु पुरुषार्थेषु प्रथमपुरुषार्थो धर्मः। मनुप्रतिपादितदशविधधर्म [1] एव श्रौतधर्मः स्मार्त्तधर्मश्चेतिरूपेण सामान्येन द्विविधः । श्रौतधर्मत्वेनात्र वैदिकं कर्म ज्योतिष्टोमादिकं प्रतीकोपासनादिकं च गृह्यते। एतदेव श्रौतधर्म वैदिकधर्मपदवाच्यः। वैदिकधर्मपदेन वैदिककर्मानुष्ठानानि यागयज्ञादीनि तथा उपनिषद्विद्यादीनि शाण्डल्यविद्यादीनि च विधीयन्ते। एतयोः स्वर्गादिसुखप्राप्तिसंसार– प्रवृत्तिहेतुत्वात् प्रवृत्त्याख्यं वैदिकं कर्म, तथा निःश्रेयसं मोक्षस्तदर्थं कर्म नैःश्रेसयिकं संसारनिवृत्तिहेतुत्वान्निवृत्त्याख्यमित्येवं वैदिकं कर्म द्विप्रकारकं वेदितव्यम्। यथाह मनुः–

> सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च।
> प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्।
> इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीत्र्यते।
> निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते। [2]

इमौ द्वौ प्रवृत्तिनिवृत्तिधर्मौ वेदेषु प्रतिपादितौ वर्त्तते। अत्र निवृत्तिविचारस्यावकाशाभावात् प्रवृत्तिविचारस्यावश्यकत्वात् तस्यैव श्रेणीविभागः समुद्दिष्टः।
धर्मशास्त्रेषु मन्वादिभिः प्रतिविभागं कर्त्तव्याकर्त्तव्यमभिहितम्। मनुस्मृतेः इदमेवैतिहासिकं तत्त्वं लभ्यते यत् वर्णविभागः स्मृतेः पूर्वमासीत्। आश्रमविभागो यदि वाऽऽसीदित्यस्य व्यवस्थितं रूपं तथा नासीत् यद्रूपं क्रमेण स्मृतौ उपलब्धम्। अतः मनुः आश्रमव्यवस्थायां तदधीनधर्मान् व्यवस्थापयामस। याज्ञवल्क्यो यदि वा गौतम–वसिष्ठ–आपस्तम्ब–व्यासप्रभृतिस्मृतिकारेभ्योऽर्वाचीनस्तथापि तस्य समये वर्णाश्रमधर्मव्यवस्थया सह इतरेषां केषाञ्चनधर्माणामव्यवस्था संघटिताऽभूत्। वसिष्ठः स्फुटं चतुर्णामाश्रमाणां परिगणनं कृतवान्। प्रथमतो मनुः धर्मव्यवस्थां कृतवान्। पुनश्च कुलपरम्परया च केषाञ्चन धर्माणां स्थितिः लभ्यते। मनसि अयमेव प्रश्नः समुदेति यद्यदि आचरितानां धर्मकार्याणामनुष्ठानेन वेदेन सह विरोधो न भवति तर्हि स एव धर्म पदवाच्यो भवति। एवं प्रकारेण तद्वचनं गृहीत्वा वेदाविरुद्धदेशजातिकुलाचाराणां धर्म प्रामाणिकोऽस्त्येवेति। पुनश्च वर्णधर्मत्वेनाश्रमधर्मत्वेन च धर्माणां मुख्यतया विभागसत्वादपि प्रतिवर्णं प्रत्याश्रमं च धर्मभेदः परिलक्ष्यते। तेषां विशेषरूपं याज्ञवल्क्यादिमुनिभिः जिज्ञासितमस्ति।

**Corresponding Author:**
**डा. शकुन्तलादाश**
अंशकालिक–अध्यापिका
श्रीजगन्नाथसंस्कृत विश्वविद्यालयः,
श्रीविहारः, पुरी,उत्कलाः, ओडिशा,
भारत

ततोऽर्वाचीनविज्ञानेश्वराचार्येण वर्णधर्मत्वेन, वर्णाश्रमधर्मत्वेन, गुणधर्मत्वेन, निमित्तधर्मत्वेन, साधारणधर्मत्वेन च धर्मशब्दः षड्स्मार्तधर्मेण विभक्तो विहितः।
विज्ञानयोगिना श्रीमता विज्ञानेश्वरेण योगीश्वरयाज्ञवल्क्यकृतस्मृतेः [3] प्रथमश्लोकस्य व्याख्यानावसरे श्श्धर्मश्शपदेन षड्विधस्मार्त्तधर्माणामुल्लेखः कृतः। अत्र सामान्येन विज्ञानेश्वरोक्तषड्विधस्मार्तधर्माः प्रतपाद्यन्ते । ते यथा – वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति ।
षट्स्मार्तधर्मेषु प्रायश्चित्तस्य योगदानम्
भारतीयधर्मपरम्परायामतिप्राचीनशास्त्राणां मूलभूतो भवति वेदः। यतो हि वेदात् प्राक् किमपि साहित्यं नोपलब्धमासीत् तदनन्तरं धरमशास्त्रस्योद्भवो जातः इति प्रामाणिकैः स्वीक्रियते। मानवजीवननस्य सुपरिचालनार्थ यस्यैव धर्मोपदेशस्यावशआयकता वर्तते तत्सर्वं धर्मशास्त्रेषूपलभ्यते। तस्यैव धर्मस्य मानवोचितकर्मणा सह निविडसम्बन्धो वर्तते। एतदेव विषयमाधारीकृत्य धर्मशास्त्रकारैः धर्मस्यानेके भेदाः प्रतिपादिताः। प्रथमतः धर्मस्य भेदद्वयं दृश्यते। यथा – श्रौतधर्मः, स्मार्तधर्मश्चेति। तद्विषये मत्स्यपुराणे उाल्लिखितमस्ति यत्–

> दाराग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणम्। [4]
> पुनस्तत्र
> स्मार्तो वर्णाश्रमाचारी यमैश्च नियमैर्युतः।। [5]

श्रौतधर्मस्य लक्षणं भवति अग्निप्रतिष्ठा, पौर्णमासी, अमावास्या, यज्ञः, सोमकृत्यानां वर्णनं चेति। तद्वदेव स्मार्त्तधर्मे वर्णाश्रमव्यवस्था, यमनियमविषये वर्णनम्, प्रायश्चित्तव्यवस्था चेति दृश्यते। मनुनाऽपि प्रवृत्तिनिवृत्तिभेदेन धर्मस्य द्वैविध्यं प्रतिपादितम्।[6] वराहपुराणानुसारं धर्मसाधारणविशेषश्च रूपेण आदृताः सन्ति।[7] महाभारतानुसारं धर्मस्त्रिधा विभज्यते यथा– वेदप्रतिपादितः, स्मृतिप्रतिपादितः, शिष्टजनानां शिष्टाचारश्चेति। विज्ञानेश्वरेण मिताक्षराटीकायां धर्मशब्देन षट्स्मार्त्तधर्माणां व्याख्या कृता।[8] षड्विधेषु स्मार्त्तधर्मेषु निमित्तधर्मोऽन्यतमः। तत्र चोच्यते विहिताकरणप्रतिषिद्ध सेवननिमित्तं प्रायश्चित्तम्।[9] अर्थात् विहितानि यानि कर्माणि सिन्त तेषां करणे अविहितानां कर्मणां करणे विहितानां कर्मणां चाकरणे नरः पत्तनमृच्छगति तेन पापं भवतीति शास्त्रकाराणामभिमतम्। पापात् तस्मात् विमोक्तुं प्रायश्चित्तीयते नरः। अतः प्रायश्चित्तस्यास्य षट्स्मार्त्तधर्मेषु अस्त्येव महद्योगदानमिति नास्ति कश्चिद्विसम्बादः। तत्र भगवता मनुना[10] प्रतिपादितं यत्–

> अकुर्वन्विहितं कर्म नन्दितं च समाचरन्।
> प्रसक्तश्चेनिद्यार्थेषु प्रायश्चित्तीयते नरः।। इति

दैनन्दिनजीवने कर्मकुर्वतां मनुष्याणां विविधेषु क्षेत्रेषु पापं भवति। पापनाशत्वेन प्रायश्चित्तस्य प्राधान्यत्वात् त एव जनाः पापापनोदाय प्रायश्चित्तमेवाङ्गीकुर्वन्ति। अतो पापनाशनमेव प्रायश्चित्तस्य मूलमन्त्रः। यद्यपि आचार–व्यवहार–प्रायश्चित्तभेदेन मुख्यरूपेण धर्मशास्त्रस्य विभागाः सन्ति तथापि शास्त्रस्यास्य सांगोपाङ्गवर्णनायै वर्ण –आश्रम –वर्णाश्रम –गुण –साधारण– निमित्तरूपेण धर्मः षड्धा विभक्तः।स्मृतिशास्त्रेषु प्रतिपादितत्वात् एते धर्माः स्मार्त्तधर्मत्वेनाभिधीयन्ते। तत्र च याज्ञवल्क्यस्मृतौ मिताक्षराकारेण विज्ञानेश्वरेण एतेषां धर्माणां अत्र च धर्मशब्दः षड्विधः स्मार्त्तधर्मविषयः,तद्यथा– वर्नधर्मः,आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः,निमित्तधर्मः,साधारणधर्मश्चेति रूपेण प्रतिपादितः। तत्र निमित्ताख्यो यो स्मार्त्तधर्मः स च विहिताकरणप्रतिषिद्धसेवनमभिलक्ष्य एवानुद्यते तर्हि वचनादस्माद्विज्ञायते यत् पापं यथा कादाचित्कत्वेन भवति तथैव तसय प्रायश्चित्तमवश्यमेव कर्त्तव्यम्। किं नाम प्रायश्चित्तमिति जिज्ञासायां मनुस्मृतौ [11] उच्यते यत्–

> प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
> तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्।।इति।

ब्रह्मचर्यादिष्वाश्रमेषु स्थित्वा यथावत् गृहस्थाश्रमं परिपाल्य मनो मोक्षे निवेशयेदिति धर्मशास्त्रकारानामाशयः। सामग्रिकरूपेण धर्मशास्त्रे वर्णिताः ये विषयाः सन्ति तेषु अस्ति यद्यपि आचारव्यवहारयोः महद्योगदानं तथापि पापनाशकत्वेनसमाजे संव्यवहारार्थं च क्रियमाणानां पापानामपनोदाय प्रायश्चित्तं नितरामेवापेक्षते। यद्यपि प्रायश्चित्तेन पापक्षयो भवति नवेति शंका परिकल्पिता वर्तते तथापि षट्स्मार्त्तधर्मेषु प्रायश्चित्तस्य तदङ्गभूतानां होम–याग–तपः–स्वाध्यायादीनामस्त्येव महद्योगदानमिति मन्वादीनां धर्मशास्त्राकाराणामभिमतम्।

## १) प्रायश्चित्तस्वरूपम्

भारतीयसंस्कृतौ प्रायश्चित्तस्य अतीवमहत्वं विद्यते। ज्ञानेनाज्ञानेन कृतशास्त्राविहितानां कर्मणां दुष्कर्मणां वा दोषमार्जनं सामान्यरूपेण प्रायश्चित्तमिति कथ्यते। साधारणतया शास्त्रनिषिद्धकर्मणामाचरणेन पापाचरणेन वा स्वान्तःशुद्धये विहितं कर्मानुष्ठानं प्रायश्चित्तपदवाच्यं वा भवति। मनुमतानुसारं –

> अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
> प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ।।
> अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ।
> कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ।। [12]

एतादृशस्य प्रायश्चित्तस्य स्वरूपं धर्मशास्त्रे सामान्यतया त्रिधोपलभ्यते। व्यक्तिगतप्रायश्चित्तम्, समाजिकप्रायश्चित्तं तथा न्याय–राज्य–परिषत्सम्बन्धी वेति। किञ्चित्कर्मणः ज्ञानं सामान्यतया न कैश्चिदपि ज्ञातुं शक्यते। अतः तत्कर्मणः अपराधस्य सम्बन्धी एव तदनुसारं शास्त्रमर्यादामनुसृत्य तस्मात्पापान्मुक्तये प्रायश्चित्तमाचरति स्म। समाजव्यवस्थानुसारं समाजनिर्दिष्टं प्रायश्चित्तं पातकी आचरति स्म। तथा राज्यन्यायानुसारं प्रायश्चित्तं पातकिनां भवति स्म।
विविधप्रकारकाणां विहितकर्मणां त्यागेन मलिनतां प्राप्तवतां पुरुषाणां शुद्धये किञ्चित्प्रायश्चित्तं वर्तते। श्रुतिस्मृतिनिर्दिष्टकर्मणामकरणे निषिद्धकर्मणां च करणे प्रायश्चित्तं मानवेनाचर्यते इति मनुवचनादेव ज्ञायते।
वैदिकसाहित्यादारभ्य स्मृति–सूत्रदिसाहित्येष्वपि प्रायश्चित्तस्य सुविस्तृतं वर्णनं प्राप्यते। प्रायश्चित्तस्य विविध–अर्थाः धर्मशास्त्रे स्मृति–सूत्र–भाष्य–निबन्धादिषूपलभ्यते। तदत्र संक्षेपेण किञ्चिदवतार्यते।

## २) वैदिकसंहितासु प्रायश्चित्तम्

ऋग्–यजुः–साम–अथर्वरूपचतसृणां संहितानां पर्यालोचनेन ज्ञायते यत्– वैदिकचिन्तने पुनर्जन्मसिद्धान्तं तथा कर्मसिद्धान्तं प्रमुखतयोपलभ्यते। कर्मानुगुणमेव मनुष्याणां मृगपक्षिणां समेषां प्राणिनां गमनागमनं जन्ममृत्युरूपं प्रचलति इति वैदिकसिद्धान्तः। पुण्यं वै पुण्येन कर्मणा पापं पापेन कर्मणा इति श्रुत्यनुसारं पुण्यभाजामुत्तमा गतिस्तथा पापभाजामधमागतिर्भवति। श्रुतिर्यथा – रमणीयचरणाः रमणीयां योनिमापद्यन्ते कपूयचरणास्तु पापयोनिमापद्यन्ते। [13] एतदेव ऋग्वेदे उपलभ्यते। तदत्र सत्यधर्मतः पतितमनुष्यस्य अभ्युदयनिःश्रेयसमार्गानुसरणनिमित्तं पुनर्जीवनप्रदानविषये वर्ण्यते। तद्यथा–

> उत देवा अवहितं देवा उन्नयथा पुनः।
> उतागश्चकृषं देवा देवा जीवयथा पुनः।।[14]
> यजुर्वेदे अशुद्धाचरणतः विरतिनिमित्तं शुद्धेः व्यवहारस्यावश्यकतां कथ्यते। तद्यथा–
> देव्याय कर्मणे शुन्धध्वं देवयज्यये।
> यद्वो शुद्धाः पराजहनुरिदं वस्तच्छुन्धामि।। [15]

अथर्ववेदे अशस्ता अर्थात् निन्दितकर्मणां विषयेभ्यः दूरं स्थातुं मनसः निग्रहमावश्यकमिति प्राप्यते।16

यजुर्वेदे वर्णितदुरितं, पापादि–अशुद्धाचरणं दूरीकरणपूर्वकं मनः शिवसंकल्पशीलं कर्तुं यत् क्रियते तदपि अत्रोल्लेखयोग्यः। तन्मे शिव संकल्पमस्तु इति।[17]
वैदिकवाङ्मये उपलब्धेयं प्रक्रिया प्रायश्चित्तस्य पारिभाषिकशब्दत्वेन स्वाक्रियतेऽत्र।
वैदिकसाहित्ये प्रायशः प्रायश्चित्ति तथा प्रायश्चित्तमिति पदद्वयस्य व्यवहारः परिलक्ष्यते यद्यपि तथापि द्वयो अभिप्रायस्त्वेक एव। अथर्ववेदे प्रायश्चित्ति इति प्रयोगो दृश्यते। यथा–

स इत् तत्स्योनं हरति ब्रह्मा वासः सुमङ्गलम्।
प्रायस्चित्तिं यो अध्येति येन जाया न रिष्पति। [18]

वेदे पापादिषु निवृत्तिपूर्वकं भद्रमार्गप्राप्तये उपलब्धासु प्रार्थनासु पापं पातकं इत्यादीनां पर्यायवाचिशब्दानां प्रयोगो दृश्यते। यथा – दुरितम्, रपः, पापं, अवद्यम्, अनृतं, दुष्कृतं, एनस्, अद्य, अहंस्, आगस् इत्यादिः। अत्र विचारेणेदं ज्ञायते यत् पापादिभ्यः निवृत्तिरेव प्रायश्चित्तमुपलक्षणार्थम्।
वैदिकसंहितासु प्रायश्चित्तस्याकरणे भाविदुष्परिणामभोगरूपं फलं श्रूयते। एताभ्यः संहिताभ्य पापानां दूरीकरणाय प्रायश्चित्तव्यवस्था वर्तत इति ज्ञायते।

### ३) ब्रह्मणग्रन्थेषु प्रायश्चित्तम्

चतुर्णां वेदानां ब्रह्मणानि अपि नैकानि। एतेषु ब्रह्मण ग्रन्थेष्वपि प्रायश्चित्तस्योल्लेखः प्राप्यते। नैकेषु ब्रह्मणग्रन्थेषु प्रायश्चित्तेभ्यः मुक्तिनिमित्तं प्रायश्चित्तशब्दस्य वर्णनं कृतं वर्तते। तदत्रोदाहणमाध्यमेन व्यवस्थाप्यते।

**षाड्विंशब्रह्मणे यथा–**

यच्चावगतं यच्चानवगतं सर्वस्यैव प्रायश्चित्तिरिति। [19]
सामविधानब्रह्मणे ब्रह्मणस्य गवादिहरणप्रायश्चित्तरूपेण कृच्छ्रव्रतपालनादिकं श्रूयते।[20]
छान्दोग्यब्रह्मणे अग्निप्रायश्चित्तं, चन्द्रप्रायश्चित्तं, वायुप्रायश्चित्तं, सूर्यप्रायश्चित्तमित्युल्लेखः प्राप्यते।[21]
जैमिनीयब्रह्मणे अमेध्यत्वप्रायश्चित्तविधानं प्राप्यते। यथा –

मान् वा एष लोकान् अनुवितनुते योऽग्निन् आधृते। तस्यायं एव लोको गार्हपत्यो भवत्यन्तरिक्षलोकोऽन्वाहार्यप्तनोऽसाव एव लोक आहवनीयः. [22] तत्र दीर्घसत्र यज्ञे अग्निहोत्रकाले सर्पिषशाकल्यादिपतिते किं तत्र कर्म प्रायश्चित्तिः इति श्रूयते। तत्रोत्तरमपि पठ्यते–यदि एव तत्र स्थाल्यां परिशिष्टं स्यात्तेन जुहूयात् इति।[23] पुनस्तत्र –
भूर्भूवः स्वरित्येताभिव्याहृतिभिः एता वै व्याहृतयः सर्वप्रायश्चित्तयः। [24]
सामविधानब्रह्मणानुसारेण आपन्नः प्रायश्चित्तं चरेदिति पठ्यते। [25]
तत्र अमेध्यदर्शनं, जिघ्रणं, अखाद्यम्, अपवित्रकाप्राशनादिकर्मणां कृते प्रायश्चित्तविधानं साममन्त्राणां गायनं विधीयते। [26]
सुरापानादीनां प्रायश्चित्तविधानमप्यत्र मिलति। यथा – एतेन भ्रूणहा पूर्वमेतेन ब्रह्महा शुद्धा शुद्धोपमुत्तरमेतेन सुवर्णस्तेनोऽभित्रिपृष्ठामित्यभित्रिपृष्ठमिति। [27]
गुरुदारान् गत्वा सुराकल्पेनाक्रानिप्येतद् गायेत्। [28]
एवमेव प्रकारेण ब्रह्मणग्रन्थेषु प्रायश्चित्तस्य सुव्यवस्थितपरम्परा दृष्टिपथगोचरा भवति।

### ४) आरण्यकेषु प्रायश्चित्तम्

प्रायश्चित्तवर्णनविषये आरण्यकपरम्परायां सुव्यवस्था मिलति। तैत्तिरीयारण्यके मनुष्यद्वारा कृतं कर्म तावन्न नष्टं भवति यावत् तेषामुपभोगो न क्रियते इति प्राप्यते। कर्म शुभमशुभं वा भवतु अवश्यमेव भोक्तव्यं भवति। तदुक्तं–

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।। [29] इति

### ५) उपनिषत्सु प्रायश्चित्तस्वरूपम्

उपनिषद् ब्रह्मविद्या आत्मविद्येत्युच्यते। उपनिषतत्साक्षात् अज्ञानहन्त्रीति धर्मार्थकाममोक्षफलदायिनी साक्षात्परम्परया वा तथा सर्वार्थप्रकाशिनीति भवति। चतुर्णां वेदानां प्रायशः अष्टोत्तरशतोपनिषदः प्रसिद्धाः भवन्ति। उपनिषदां ब्रह्मविद्याप्रकाशत्वेन किं वा प्रायश्चित्तप्रकाशे सामर्थ्यं विद्यते इत्युत्तरे चित्तशुद्ध्यर्थमपि दहरशाण्डिल्य–उीथविद्यादिमाध्यमेन अस्ति एतासां सामर्थ्यमिति। यतो हि उपनिषदेव शुभाचरणे प्रवृत्तिम् अशुभाचरणे निवृत्तिं दर्शयति। यथा बृहदारण्यके–
यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापं पापेन । अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत् क्रतुर्भवति तत्कर्म कुरुते यत्कर्मतदभिसम्पद्यते इति। [30]
छान्दोग्ये – अथ खलु क्रतुमयपुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति। [31]

कठोपनिषदि [32] उच्यते–
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्।।
मैत्रेय्युपनिषदि –
यत्किञ्चिदिह दृश्ये लोके शुभाशुभमिति।[33]
शुभाशुभं च कर्म विन्दति। [34]

अत्र शुभकर्मणो शुभफलं तथा अशुभकर्मणो अशुभफलमित्यनेन प्रायश्चित्तमुपलक्षितम्। वस्तुतः प्रायश्चित्तसाधनत्वेन साक्षादुपनिषत्सु ज्ञानमेव मुख्यं भवति। यज्ज्ञात्वा मोक्ष्यसेऽशुभात् इत्यादि कथनात्।

### ६)धर्मसूत्रेषु प्रायश्चित्तविधानम्

धर्मशास्त्रसाहित्यं श्रुतित आरभ्यते धर्मसूत्रेषु स्वकलेवरं वर्द्धयत्येव प्रायतः। अतः सूत्रग्रन्थेषु प्रायश्चित्तविधानं व्यवस्थितरूपेण दृष्टिगोचरं भवति धर्मसूत्रेषु। वेदाङ्गभूतस्य कल्पस्य एको भागः धर्मसूत्रं भवति। अत्रैव धर्मविधानं संस्कार–आचारादिकं सर्वं प्राप्यते। अतः शुद्धिविचारः, अशुद्ध–अशौचनिराकरणोपायाः इत्यादिधर्मशास्त्रीयाः विषयाः बहुशः उपलभ्यन्तेऽत्र। अतः प्रायश्चित्तस्य सर्वाङ्गीणविवेचनमत्र निबद्धं भवति। अत्र प्रमुखधर्मसूत्राधारेण प्रायश्चित्तविवेचनं प्रस्तूयते।
आपस्तम्बधर्मसूत्रे ज्ञानपूर्वकं यत्पापमाचर्यते तेभ्यः मुक्तये आजीवनं प्रायश्चित्तं विधेयं भवति।[35]

**गौतमधर्मसूत्रे**

तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते। न कुर्यादित्याहुः।।
न हि कर्म क्षीयते इति। कुर्यादित्यपरम्। [36]

**वसिष्ठधर्मसूत्रे**

अनभिसंधिकृते प्रायश्चित्तमपराधे। [37]
आपस्तम्बानुसारं मृत्युपर्यन्तक्रियमाणं प्रायश्चित्तं सर्वमपि पापं नाशयतीति।[38]
वसिष्ठधर्मसूत्रे तथा गौतमधर्मसूत्रे विशद्वर्णनं प्राप्यते प्रायश्चित्तविषये। तत्र –
गुरुतल्पगः सवृषणं शिश्नमुद्धत्याञ्जलावाधाय दक्षिणामुखो गच्छ यत्रैव प्रतिहन्यात्तत्र तिष्ठेदाप्रलयम्। 39 इति।
तस्य निष्क्रयणानि जपस्तपो होम उपवासो दानम्। [40]
गौतमधर्मसूत्रे प्रायश्चित्तविषये अष्टाविंशतिः अध्यायाः सन्ति। एतेनास्य महत्वं ज्ञातुं शक्यते। अत्र तु संक्षेपेण धर्मसूत्रेषु प्रायश्चित्तस्य विधानं विहितम्।

### ७)प्रमुखस्मृतिग्रन्थेषु प्रायश्चित्तविधानम्

मनु–याज्ञवल्क्य–पाराशर–हारीतादिप्रमुखस्मृतिग्रन्थेषु पापानुसारेण प्रायश्चित्तविधानं वर्णितमस्ति। धर्माधर्मनिर्धारणे कर्तव्याकर्त्तव्यविचारणे स्मृतीनां महत्वपूर्णस्थानं विद्यते।

[41]मनुस्मृतौ प्रायश्चित्तविषये उक्तं यथा –
अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ।।
अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ।।
अकामतः कृतं पापं वेदाभ्यासेन शुध्यति ।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः ।।
प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा ।
न संसर्गं ब्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः ।।
विहिताननुष्ठानात् तथा निषिद्धसेवननिमित्ते विहितं कर्म प्रायश्चित्तम् इति। याज्ञवल्क्यस्मृतौ[42] पापक्षयार्थं प्रायश्चित्तम् इति विहितम्। तत्र यथा–
विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ।।
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ।
एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति ।।
प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः ।
अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ।।
अङ्गिरा वचनं यथा–
प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयोगात् प्रायश्चित्तमिति स्मृतम्।। [43]

प्रायश्चित्तशब्दस्य नित्य–नैमित्तिक–काम्यकर्मसु सम्बन्धोऽस्ति। तथा प्रायश्चित्तमपि स्वयं नित्य–नैमित्तिक–काम्यकर्मस्वरूपं गृह्णाति। अतः त्रिवतमित्यपि कथ्यते। नित्यानि कर्माणि अकरणे प्रत्यवायसाधनानि अतः नित्यानि नूनं कर्त्तव्यानि। प्रत्यहमज्ञानेन कृतस्य पापस्य विनिवृत्तये नित्यानां कर्मणां विधानम्। अतो मनुना कथितं–

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युयस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ।।
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ।। [44]
पञ्च महायज्ञाः प्रायश्चित्तत्वेनोक्ताः भवन्ति। यतो हि एतेषां करणेन गृहस्थः पञ्च पापैर्न लिप्यते। एतेषां स्वरूपं यथा–
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ।।
पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः ।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते ।। [45]

[46]मिताक्षराकारविज्ञानेश्वरमतानुसारं प्रायश्चित्तं कर्मविशेषे रूढः यथा– प्रायश्चित्तशब्दस्यार्थः पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढः। याज्ञवल्क्यस्मृतौ तु प्रायश्चित्तविषये सम्पूर्ण एक अध्यायः विहितः विस्तृतशः।
मनुयाज्ञवल्क्यादिकथनानुसारं प्रायश्चित्त–अकरणे दुष्परिणाम एवास्ति। प्रायश्चित्तेन पापनाशं सम्पूर्णं न भवति चेदपि अन्तश्शुद्धिस्तु भवत्येव। तथा पापजन्यकष्टेभ्यः मुक्तेर्भवति मानवः।

### ८) श्रुतिस्मृतिविहितप्रायश्चित्तविधानेषु आन्तस्सम्बन्धः

स्मृतिग्रन्थाः श्रुतेः अर्थं सरलतया विशदरूपेण प्रतिपादयन्ति। अतः श्रुतिः अननुशीलानां साधारणमानवानां कृते ऋषिभिः स्मृतिशास्त्राणि प्रणीतानि। अतः स्मृतिशास्त्रेषु प्रायश्चित्तव्यवस्था विस्तृतरूपेण श्रुत्यनुसारिणी प्राप्यते। एवम्प्रकारेण श्रुतिस्मृतिप्रतिपादितप्रायश्चित्तविधानानि नैव विमतानि किन्तु एकरूपतां सम्पादकानि भवन्ति। वैदिकसाहित्ये यत्प्रायशित्तविधानं प्राप्यते स्मृतिषु तद्भिन्नविधानानि भवन्ति किन्तु तानि सर्वाण्यपि अन्तःकरणशुद्ध्यर्थानि एव भवन्ति । अतः श्रुतिभ्यः भिन्नान्यपि प्रायश्चित्तानि स्मृत्युक्तान्यभिन्नान्येवेति दिक्।

**पादटिप्पणी**

1. म.स्मृ., ६–६२
2. म.स्मृ.१२.८८–८६
3. या.स्मृ.मिता. १/१
4. म०पु०४४.३०
5. म०पु०४४.३२
6. म०स्मृ०१२.८८
7. ध.द्रु.पृ.११०
8. या०स्मृ०१.१मिता०पृ.१
9. या०स्मृ०मिता०१.१
10. म०स्मृ०११.४४
11. म०स्मृ०११.५
12. मनु.११/४४–४५
13. छा.उप.६/४
14. ऋ.वे.१०/१३६/१
15. यजु.वे.१/३
16. अथ.वे.६/४५/१
17. यजु.वे.३०/३,४०/१६,३४१/६
18. अथ.वे.१४/१/३१
19. षड्.ब्र.१/२/१३,१/६/१८
20. सामविधान.ब्र.१/६
21. छान्दोग्य.ब्र.१/४/१–५
22. जै.ब्र. १/५१
23. जै.ब्र. १/५३
24. जै.ब्र. १/५३,१/६०
25. साम.वि.ब्र.१/५/३
26. तत्र. १/५/१०–१३
27. तत्र १/५/१६
28. तत्र १/६/३
29. तैत्ति.आ.८/२, प्रा.वि.पृ.१३
30. बृ.उ.४/४/५
31. छा.उ.३/१४/१
32. क.उ.५/७
33. मैत्रेयी.उ.६/१६
34. गर्भोपनिषद्.३
35. आप.ध.सू.१/१०/२८/१८
36. गौ.ध.सू.१६/३–६
37. व.ध.सू.२०/१
38. आप.ध.सू.१/१०/२८/१८
39. वशि.ध.सू.२०/१३ , गो.ध.सू.२३/१०–११
40. गौ.ध.सू., वसिष्ठ.१६/११, बौधा.ध.सू.२२/८
41. मनु.११/४४–४७
42. या.स्मृ.३/२१६–२२१
43. प्रा.वि.पृ२
44. मनु. ३/६८–६६
45. मनु. ३/७०–७१
46. या.स्मृ.मिता.३/२२०

**संदर्भ**


1. आपस्तम्बधर्मसूत्रम् – चौखम्बा संस्कृत सिरिज् अफिस्, वाराणसी,१६७१.
2. ऋग्वेदसंहिता – चौखम्बा संस्कृत सिरिज् अफिस्, वारणसी, १६६४.
3. 3.गौतमधर्मसूत्रम् – चौखम्बा संस्कृत सीरीज अफिस, वाराणसी, १६६६.
4. चतुर्वर्गचिन्तामणिः – हेमाद्रिभट्टः, चौखम्बा संस्कृत संस्थान,वाराणसी, १६८५

5. धर्मशास्त्र का इतिहास,डा.पी.वी, काणे,अनुवादः–अर्जुनचौवेकाश्यप,उ.प्र.हिन्दीसंस्थानम्, लखनऊ– १९६१
6. धर्मशास्त्रशब्दकोशः, पं. कुलमणिमिश्र शर्मा, ओडिशा राज्य पर्यटन–क्रीडासंस्कृति निर्देशालय, भुवनेश्वरम्,१९८१
7. धर्मशास्त्रस्येतिहास,प्रो.जयकृष्णमिश्रः,चौखम्बासंस्कृत सीरीज अफिस, वाराणसी, २०१०
8. धर्मसिन्धुः, श्रीकाशीनाथ उपाध्यायः, चौखम्बासंस्कृतसीरिज ,वाराणसी– १९६८
9. नारदस्मृतिः, स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली–७१९८८
10. पराशरस्मृतिः (माधवीयसहिता) चौखम्बा संस्कृत सीरिज अफिस,वाराणसी ,२०१२
11. प्रायश्चित्ततत्त्वम्रघुनन्दनः,(शोधप्रबन्धः) श्रीसदाशिवपरिसरः,पुरी
12. प्रायश्चित्तमयूखः गुजराती प्रिंटिं प्रेस्,अहमदावाद
13. प्रायश्चित्तविवेकः (तत्त्वार्थकौमुद्या युक्तः) श्री सदा शिव केन्द्रीय विद्यापीठम्, पुरी,१९८२
14. प्रायेश्चित्तेन्दुशेखरः ,आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम्,१९६१
15. बृहदारण्यकोपनिषत् दृ मोतिलालवनारसीदास्, दिल्ली, १९८४
16. बौधायनधर्मसूत्रम्,चौखम्बा संस्कृत सीरिज अफिस,वाराणसी,२००८
17. भारतीयदर्शन (हिन्दी) बलदेवोपाध्यायः, मोतिलाल वनारसि दास, १९७६
18. मनुस्मृतिः – मन्वर्थमुक्तावलीसहिता, मोतिलालवनारसीदास, वाराणसी, १९९०
19. याज्ञवल्क्यस्मृतिः – मिताक्षरासंहिता, निर्णयसागरप्रेस्, मुम्बई, १९४६
20. वसिष्ठधर्मसूत्रम् दृ तत्त्वप्रकाशिकासहितम्, संपा–विश्वनाथस्वाई, पुरी, २००५.